एतस्यैव गुणा उक्ता वङ्गसेनेन ।
"अष्टादशाङ्गमित्येष मृत्युकल्पं ज्वरं जयेत् ॥"
इति ॥*॥
अथ सन्निपातज्वरे रसाः ।
"विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्बकम् ।
धुस्तूरस्य च बीजानि हिङ्गुलं नवमं स्मृतम् ॥
एतानि समभागानि दिनैकं विजयाद्रवैः ।
मर्द्दयेच्चणकाकारा कर्त्तव्या वटिकाथ सा ॥
भक्षणीया तु पातव्यो रविमूलकषायकः ।
मृतसञ्जीवनी नाम्ना सन्निपातज्वरान्तकृत् ॥"
इति मृतसञ्जीवनी वटिका ॥*॥
सन्निपातज्वरे रसप्रदीपे ।
"शुद्धसूतसमं गन्धं सूतांशं मृतताम्रकम् ।
त्रिभिस्तुल्यैर्गवां क्षीरैर्मर्द्दयेदातपे खरे ॥
मर्द्दयेद्दिनमेकन्तु निर्गुण्डीशियुजद्रवैः ।
विधाय गोलं तं गोलमन्धमूषागतं पचेत् ॥
त्रियामान् वालुकायन्त्रे ततः खल्ले विचूर्णयेत् ।
अष्टमांशं विषं तत्र क्षिपेत्तेनापि मर्द्दयेत् ॥
त्रिनेत्राख्यो रसो ह्येष ज्ञेयो गुञ्जाद्वयोन्मितः ।
पञ्चकोलकषायेण छागीदुग्धेन वा सह ॥
रसेनानेन भुक्तेन सन्निपातज्वरो महान् ।
संक्षयं व्रजति क्षिप्रं कर्त्तव्यो नात्र संशयः ॥"
इति त्रिनेत्रो रसः ॥*॥
सन्निपातज्वरे रसप्रदीपे ।
"भस्म षोड़शनिष्कं स्यादारक्षोपलसम्भवम् ।
मरिचं निष्कमात्रञ्च विषं निष्कं विचूर्णयेत् ॥
रसो भस्मेश्वरो नाम्ना सन्निपातज्वरान्तकृत् ।
एकगुञ्जामितो भक्ष्य आर्द्रकस्य द्रवेण हि ॥"
इति भस्मेश्वरो रसः ॥*॥
सन्निपातज्वरे रसेन्द्रचिन्तामणौ ।
"द्वौ कर्षौ सूतकाद्भागौ गन्धकाद्वौ तथैव च ।
यत्नतस्तूभयं मर्द्यं दिनं हंसपदीरसैः ॥
कल्कस्य वटिकां कृत्वा निःक्षेत् काचभाजने ।
दर्षैकमसृतं तत्र क्षिप्ता वक्त्रं निरोधयेत् ॥
कूपिकायाः परौ भागौ वालुकाभिश्च पूरयेत् ।
ऊर्द्ध्वं यावदहोरात्रं तावत्तत्र पचेद्रसम् ॥
दीपमात्रोऽनलो देयः स्वाङ्गशीतं तमुद्धरेत् ।
तोलार्द्धममृतं तत्र क्षिपेत्तावत्तथोषणम् ॥
भक्षितो रक्तिकामात्रो रसस्त्वग्निकुमारकः ।
सन्निपातज्वरं हन्याद्वातं मन्दाग्नितामपि ॥
शूलं संग्रहणीं गुल्मं क्षयं पाण्डुगदं तथा ।
श्वासकासादिकान् सर्व्वान् गदानेष विना-
शयेत् ॥"
इति अग्निकुमारो रसः ॥*॥
सन्निपातज्वरादिषु रसेन्द्रचिन्तामणौ ।
"गन्धेशटङ्कमरिचं विषं धर्त्तूरजैर्द्रवैः ।
दिनसंमर्द्दितं शुष्कं पञ्चवक्त्रो रसो भवेत् ॥
आर्द्रकस्य द्रवेणैष दातव्यो रक्तिकामतः ।
सन्निपातज्वरं घोरं नाशयेन्नात्र संशयः ॥"
ईशः पारदः । टङ्कः टङ्कणः । पञ्चवक्त्रो रसः ॥*॥
सन्निपातज्वरे रसेन्द्रचिन्तामणौ । अथ शीत-
ज्वरे रसाः ।

"सूतकं गन्धकञ्चैव हरितालं मनःशिलाम् ।
एकनिष्कं द्विनिष्कञ्च चतुर्निष्कं तथैव च ॥
पञ्चनिष्करसैः कारवेल्ल्याः कल्कं प्रकल्पयेत् ।
ताम्रपत्राणि तुल्यानि तेन कल्केन लेपयेत् ॥
सरावसंपुटे तानि कृत्वा तेषामुपर्य्यपि ।
दद्यात्तां पिष्टिकां पश्चात् पुटपाकेन पाचयेत् ॥
ततः संचूर्णयेदेव रसः क्षौद्रेण भक्षितः ।
यवैकमात्रया हन्ति घोरं शीतज्वरं ध्रुवम् ॥"
पाराटङ्कः १ गन्धकटङ्कः २ हरितालटङ्कः ४
मनःशिलाटङ्कः ५ ताम्रपत्रटङ्कः १२ । इति
शीतज्वरारिरसः ॥*॥ रसप्रदीपे ।
"पारदं गन्धकं तुल्यं दरदञ्च विषं समम् ।
विषादष्टगुणं योज्यं मरिचं विश्वभेषजम् ॥
अश्वगन्धा तु विजया कासमर्दकठिल्लकः ।
चतुर्णाञ्च रसैरेतच्चूर्णं यत्नेन मर्दयेत् ॥
तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।
हन्ति शीतज्वरं घोरं नाम्नायं शीतकेशरी ॥"
इति शीतकेशरीरसः ॥*॥
रसप्रदीपे ।
"तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोपरि ।
नवमांशञ्च तुत्थं स्यात् मर्दयेत् कन्यकाद्रवैः ॥
तत्तु संशुष्कमुपलैर्वन्यैर्गजपुटे पचेत् ।
शीतं तच्चूर्णयेदस्य गुञ्जामात्रं सितायुतम् ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
वान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ॥"
इति शीतभञ्जी ॥*॥
"रसकं पारदं तुल्यं तालकं गन्धटङ्कणम् ।
सर्व्वमेतत् समं चूर्णं कारवेल्लीरसैर्दिनम् ॥
मर्दयेत्तेन शुद्धस्य रसकादिसमस्य तु ।
ताम्रस्य भाजनस्यान्तर्लिम्पेदर्द्धाङ्गुलोन्मितम् ॥
तत् पचेद्वालुकायन्त्रे यवा यावत् स्फुटन्ति हि ।
शीतलं तद्धि गृह्णीयात्ताम्रपात्रोदराद्भिषक् ॥
शीतभञ्जी रसो माषमात्रो मरिचसंयुतः ।
भक्षितः पर्णखण्डेन नाशयेद्विषमज्वरान् ॥"
इति शीतभञ्जी रसः ॥*॥
शीतज्वरादिविषमज्वरेषु रसेन्द्रचिन्तामणौ ।
"तालको दरदोद्भूतपारदो गन्धकः शिला ।
क्रमाद्भागार्द्धरहितं कारवेल्लाम्बुमर्दितम् ॥
अनेनास्य प्रमाणेन ताम्रपात्रीं प्रलेपयेत् ।
अधोमुखीं दृढ़े भाण्डे तान्निरुध्याथ पूरयेत् ॥
शुभ्रां वालुकया चाग्निमग्निं प्रज्वालयेद्दृढ़म् ।
शीतं संचूर्ण्य माषोऽस्य नागवल्लीदले स्थितः ॥
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान्
शीतदाहादिकान् हन्ति पथ्यं शाल्यौदनं
पयः ॥"
इति शीतभञ्जीरसः ॥*॥
रसरत्नप्रदीपे ।
"रसं गन्धं विषञ्चैव समं शुद्धञ्च टङ्कणम् ।
मर्दयेत् खल्लमध्ये तु यावत् कज्जलसन्निभम् ॥
नकुलस्य मुखे क्षिप्ता मृदा संवेष्टयेद्दृढ़म् ।
स्थापयेत् मृण्मये पात्रे अधोऽर्द्धलवणं न्यसेत् ॥
मुखे भाण्डं संनिरुध्य चतुर्यामं दृढ़ाग्निना ।

स्वाङ्गशीतं समुद्धृत्य कृत्वा खल्लेषु कज्जलीम् ।
गुञ्जाद्वयप्रमाणेन नस्यकर्म्मणि योजयेत् ।
वामभागे ज्वरं हन्ति तत्क्षणात् कौतुकं महत्
योजयेद्दक्षिणे भागे आरोग्यं निश्चितं भवेत् ॥"
इत्यर्द्धनारीनाटेश्वरो रसः ॥*॥
शीतज्वरादिविषमज्वरेषु रसरत्नप्रदीपे ।
"कट्फलं त्रिफलादारुचन्दनं सपरूषकम् ।
कटुकापद्मकोशीरं विपचेत् कर्षकं जले ॥
त्रिदोषदाहतृष्णाघ्नं पानमात्रेयपूजितम् ।
दीर्घकालज्वरार्त्तानामेतत् स्यादमृतोमम् ॥"
कर्षं कट्फलाद्युशीरान्तानां समुदितानां जले
प्रस्थमिते विपचेत् अर्द्धशेषम् । कट्फलादिपानं
तृष्णायां दाहे च ।
"सन्निपाते तु दाहार्त्तं यः सिञ्चेच्छीतवारिणा
आतुरः स कथं जीवेद्भिषग्वा स कथं भवेत् ॥"
एष सन्निपातिनो दाहे शीताम्बुसेकनिषेधो रुग्-
दाहान्यत्र तत्र व्याप्याद्यवगाहनस्योक्तत्वात् ॥*॥
अथान्नमाह ।
"दुःस्पर्शगोक्षुरक्षुद्रासिद्धमाहारमर्पयेत् ।
दोषशान्तिबलाग्न्यर्थं त्रिदोषज्वरिणे भिषक् ॥"
दुःस्पर्शो यवासः । आहारमुचितमन्नम् ॥
"लाजशक्तून् समश्नीयात् सैन्धवेन समन्वितान्
ते चेज्जीर्य्यन्त्यविघ्नेन ज्वरी जीवेत्तदा ध्रुवम् ॥"
इति केचित् ॥
रक्तपित्ते हितत्वेन तृष्णादाहज्वरेषु च ।
लाजानां शक्तवः शीता न च तेऽत्र हिता
मताः ॥
पाचनो दीपनः सोष्णो लाजमण्डो यतः स्मृतः ।
दशमूलादिसंसिद्धः सन्निपातज्वरे हितः ॥
सन्निपातज्वरी यस्तु कम्पते प्रलपत्यपि ।
किञ्चिदेव न जानाति चिकित्सा तस्य कथ्यते ॥
अभ्यञ्जयेत् पुराणेन सर्पिषा पूर्व्वमेव तम् ।
बलारास्नागुडूच्याद्यैस्तैलैश्च परिषेचयेत् ॥
वर्त्तको वर्त्तका लावो वार्त्ताकस्तित्तिरिः शशः ।
कुलिङ्गश्च रसैरेषां तर्पयेत यथानलम् ॥"
वर्त्तकः बटेर इति लोके । वर्त्तका बटई इति
लोके । वार्त्ताको वातचटक इति निर्घण्टः ॥
वगेरा इति लोके । कुलिङ्गो गरगरैया इति
लोके ।
"सन्निपाते क्षुधार्त्तं यो भोजयेत्-पिशितौदनम्
स कथं भिषगाख्यान्तु लभते मनुजाधमः ॥"*॥
अथ वातोल्वणसन्निपातज्वरस्य चिकित्सा ।
"पञ्चमूलीकषायन्तु दद्याद् वातोत्तरे ज्वरे ।
शृतोष्णं वा सुखोष्णं वा दृष्ट्वा दोषबलाबलम् ॥"
पञ्चमूली महती प्रथमं प्राप्तायास्त्यागे वचना-
भावात् ॥*॥ अथ पित्तोल्वणसन्निपातज्वरस्य
चिकित्सा ।
"परूषकाब्दि त्रिफला देवदारु च कट्फलम् ।
चन्दनं पद्मकं चैव तथा कटुकरोहिणी ॥
पृश्निपर्णी शृतं त्वेभिर्व्यपितं शीतलं जलम् ।
पित्तोत्तरे नृणामेतत् सन्निपाते चिकित्सितम् ॥"
इति परूषकादिक्वाथः ॥*॥